# श्री मार्गबन्धु स्तोत्रम्

## śrī mār-ga-ban-dhu stot-ram

| | |
|---|---|
| शंभो महा–देव देव | śam-bho mahā-deva deva |
| शिव शंभो महा–देव देवेश शंभो | śiva śam-bho mahā-deva deve-śa -śam-bho |
| शंभो महा–देव देव ॥ | Śam-bho mahā-deva deva \|\| |
| फालावनम्रत्किरीटं | phā-lā-vana-mrat-ki-rī-ṭaṁ |
| फालनेत्रार्चिषा दग्धपञ्चेषुकीटम् । | phā-la-ne-trār-ci-ṣā dag-dha-pañ-ceṣu-kī-ṭam \| |
| शूलाहतारातिकूटं, | śūlāhatārātikūṭaṁ, |
| शुद्धमर्धेन्दुचूडं | śud-dham-ar-dhen-du-cū-ḍaṁ |
| भजे मार्गबन्धुम् ॥ | bhaje mārgabandhum\|\| |
| शंभो महा–देव देव | śam-bho mahā-deva deva |
| अङ्गे विराजद्भुजङ्गं | aṅ-ge vi-rā-jad-bhu-jaṅ-gaṁ |
| अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गं | abh-ra-gaṅ-gā-ta-raṅ-gā-bhi-rā-mot-ta-māṅ-gaṁ |
| ओंकारवाटीकुरङ्गं | om-kā-ra-vā-ṭī-ku-raṅ-gaṁ |
| सिद्धसंसेविताङ्–घ्रिं | sid-dha-saṁ-sevi-tāṅgh-riṁ |
| भजे मार्गबन्धुम् ॥ | bhaje mārgabandhum\|\| |
| शंभो महा–देव देव | śam-bho mahā-deva deva |

| | |
|---|---|
| नित्यम् चिदानन्दरूपं | nit-yam ci-dā-nan-da-rū-paṁ |
| निह्नुताशेषलोकेशवैरिप्रतापं | nih-nu-tā-śe-ṣa-lo-ke-śa-vai-ri-pra-tā-paṁ |
| कार्तस्वरागेन्द्रचापं कृत्तिवासं | kār-ta-sva-rā-gendra-cā-paṁ kṛt-ti-vā-saṁ |
| भजे दिव्यसन्मार्गबन्धुम्। | bha-je div-ya-san-mār-ga-ban-dhum। |
| **शंभो महा-देव देव** | **śam-bho mahā-deva deva** |
| कन्दर्पदर्पघ्नमीशं | kan-darpa-dar-pagh-nam-īśaṁ |
| कालकण्ठं महेशं महाव्योमकेशं | kāla-kaṇ-ṭhaṁ mahe-śaṁ mahā-vyo-ma-ke-śaṁ |
| कुन्दाभदन्तं सुरेशं | kun-dā-bha-dan-taṁ sureśaṁ |
| कोटिसूर्यप्रकाशं | koṭi-sūr-ya-pra-kā-śaṁ |
| भजे मार्गबन्धुम्॥ | bhaje mārgabandhum॥ |
| **शंभो महा-देव देव** | **śam-bho mahā-deva deva** |
| मन्दारभूतेरुदारं | mandā-ra-bhū-teru-dā-raṁ |
| मन्दरागेन्द्रसारं महागौर्यदूरं | manda-rāgen-dra-sā-raṁ mahā-gaur-ya-dū-raṁ |
| सिन्दूरदूरप्रचारं सिन्धुरजातिधीरं | sindūra-dūra-pra-cā-raṁ sindhu-rajā-ti-dhī-raṁ |
| भजे मार्गबन्धुम्॥ | bhaje mārgabandhum॥ |
| **शंभो महा-देव देव** | **śam-bho mahā-deva deva** |
| अप्पय्ययज्ज्वेन्द्र गीतं | ap-payya-yajj-ven-dra gī-taṁ |
| स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे | sto-tra-rājaṁ pa-ṭhed-yastu bhak-tyā pra-yā-ṇe |
| तस्यार्थसिद्धिं प्रदत्ते | tas-yār-tha-sid-dhiṁ pra-datte |
| मार्गमध्येऽभयं चाशुतोषो महेशः। | mārga-madh-ye'bha-yaṁ cā-śu-toṣo- mahe-śaḥ। |